**शाण्डिल्य** त्रि० शण्डिलस्यापत्यम् यञ्। गोत्रप्रवर्त्तके भक्तिशास्त्रकारके १मुनिभेदे मेदि०। भक्तिशब्दे तन्मतं दिङ्मात्रं दर्शितम्। तत्प्रियत्वात् २बिल्वे अमरः ३वह्निभेदे च मेदि०।

**शात** न० शो-क्त। १सुखे २तद्वति त्रि० अमरः। ३छिन्ने ४कृशे त्रि० विश्वः। ५दुर्बले ६निशिते च त्रि० मेदि०। ७धुस्तूरे पु० अमरः। [अमरः २धुस्तूरे ३करवीरे च पु० मेदि०।

**शातकुम्भ** न० शतकुम्भे गिरौ भवः अण्। १हिरण्ये

**शातकौम्भ** न० शतकुम्भे भवम् अण् द्विपदवृद्धिः। १हिरण्ये २धुस्तूरे च द्विरूपकोषः।

**शातन** न० शो-णिच्-तङ् च ल्युट्। १तनूकरणे २विनाशने च "वसन्ते सर्वशस्यानां जायते पत्रशातनम्" इति अधिकरणमाला। [चन्द्रप्रकाशे शब्दच०।

**शातपत्रक** पु० शतपत्त्रमिव कायति कै-क स्वार्थे अण्।

**शातभीरु** पु० शाता दुर्बलाः पान्था भीरवो यस्याः ५ब०। १मल्लिकाभेदे रत्नमाला। [त्रि०कौ०।

**शातमान** त्रि० शतमानेन क्रीतम् अण्। शतमानेन क्रीते

**शातला** स्त्री शातं कार्श्यं लाति ला-क। (चामकषा) इति भरतः।

**शातातप** पु० स्मृतिकारके मुनिभेदे। तेन प्रोक्तं छ। शातातपीय तत्प्रोक्ते कर्मविपाकग्रन्थे।

**शात्रव** पु० शत्रुरेव स्वार्थेऽण्। १रिपौ अमरः। तस्य भावः तेषां संघो वा अण्। २वैरे ३रिपुसमूहे च न०।

**शाद** पु० शद-घञ्। १कर्दमे २हरिततृणे च अमरः।

**शादहरित** पु० शादेन हरितस्तद्वर्णयुक्तः। शाद्वले देशे अमरः

**शाद्वल** पु० शादाः सन्त्यत्र ड्वलच्। बहुलहरिततृणयुक्ते देशे अमरः। [अशीशांसीत् अशीशांसिष्ट।

**शान** तेजने भ्वा० उभ०सक०सेट् स्वार्थे सन्। शीशांसति ते

**शान** पु० शान-अच् शो निशाने इत्युक्तेरनित्यः सन्। अस्त्रादीनां तीक्ष्णताकारके यन्त्रभेदे भरतः।

**शानी** स्त्री शान-इन् ङीप्। इन्द्रवारुण्यां शब्दच०।

**शान्त** त्रि० शम-क्त। १शमयुक्ते २अभियुक्ते च शम-णिच्-क्त नि०। ३शान्तिं गमिते त्रि०। ४निर्वेदस्थायिभावके रसभेदे पु० मेदि०। ५लोमपादराजकन्यायाम्, ऋष्यशृङ्गपत्न्यां ६शमीभेदे च स्त्री राजनि०।

शान्तरसनिरूपणं सा०द० ३प० यथा

"शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः। कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः। अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या। परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः। रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः। निर्वेदहर्षस्मरणमतिभूतदयादयः। निरहङ्काररूपत्वाद्दयावीरादिरेष नो"। दयावीरादौ हि जीमूतवाहनादौ अन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्त्तित्वाद्याप्तेर्दर्शनादहङ्कारोपशमो न दृश्यते। शान्तस्तु सर्वप्रकारेणाहङ्कारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति। अतश्च नागानन्दे शान्तरसप्रधानत्वमपास्तम्"। ननु "न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा। रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रमाणः" इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात् तत्र सञ्चार्यादीनामभावात् कथं रसत्वमित्युच्यते। "युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः। रसतामेति तदस्मिन् सञ्चार्यादेः स्थितिश्च न विरुद्धा"। यश्चास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः। उक्तं हि "यच्च कामसुखं लोके यच्च दिव्यं महासुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्। सर्वाकारमहङ्काररहितत्वं व्रजन्ति चेत्। अत्रान्तर्भावमर्हन्ति दयावीरादयस्तदा"। आदिशब्दात् धर्मवीरदानवीरदेवताविषयरतिप्रभृतयः"। [नव" इति तत्तपर्यवसन्नः।

**शान्तनव** पु० शान्तनोरपत्यम् अण्। भीष्मे "भीष्मः शान्त०

**शान्तनु** पु० द्वापरयुगभवे चन्द्रवंश्ये प्रतीपराजपुत्रे नृपभेदे

**शान्तम्** अव्य० शान्ति+वा० डमु। निवारणे मेदि०।

**शान्ति** स्त्री शम-क्तिन्। १कामक्रोधादिजये २विषयेभ्यो मनसो निवर्त्तने अमरः। ३उपद्रवनिवारणे ४निवारणे च "यत्किञ्चिद्वस्तु संप्राप्य स्वल्पं वा यदि वा बहु। या तुष्टिर्जायते चित्ते सा शान्तिः कथ्यते बुधैः" पद्मपु० क्रियायो० उक्ते ५सन्तोषभेदे ६दुर्गायाम् "सर्वज्ञा सर्ववेत्तृत्वात् शान्तित्वाच्छान्तिरुच्यते" देवीपु०। ७पूजाहोमजपदानादिद्वारा गोचरविलग्नादिस्थग्रहदौःस्थ्यदुःस्वप्नादिसूचितैहिकानिष्टहेतुपापनिवृत्तौ च "यथा शस्त्रप्रहाराणां कवचं विनिवारकम्। तथा दैवोपघातानां शान्तिर्भवति वारणम्" मलमासतत्त्ववाक्यम्। सा च मलमासेऽपि कार्या नैमित्तिकत्वात् "नैमित्तिकानि काम्यानि निपतन्ति यथा यथा। तथा तथैव कार्याणि